# आयुर्वेदस्य दर्शनत्व विचारः

भट्ट मौलिककुमार अरविन्दभाई एवं डॉ.भिखालाल एम. प्रजापति
*श्री स्वामिनारायण विश्वविद्यालयः, कलोल, गांधीनगरम्*
*मार्गदर्शक, श्री स्वामिनारायण विश्वविद्यालयः, कलोल, गांधीनगरम्*
doi.org/10.64643/IJIRTV12I8-189743-459

## प्रस्तावना

भारतीयज्ञानपरम्परायां दर्शनानां स्थानं सर्वोच्चं परिगण्यन्ते । दर्शनं न केवलं तत्त्वज्ञानं, किन्तु जीवनस्य मूलप्रश्नानां - "अहं कः ? किं जगत् ? किं सुखम् ? किं दुःखम् ? कथं मोक्षः?" इत्यादीनां समाधानं ददाति । आयुर्वेदः यद्यपि चिकित्साविज्ञानरूपेण प्रसिद्धः, तथापि भारतीयदर्शनपरम्परायाः अविच्छिन्नम् अङ्गम् अस्ति । भारतीयदर्शनपरम्परा विश्वे अद्वितीया वर्तते । एतस्यां परम्परायां यत्र अस्तित्वस्य मूलरूपम्, दुःखस्य कारणम्, तथा निवारणोपायाः निरूप्यन्ते, तत्र आयुर्वेदः केवलं चिकित्साशास्त्रत्वेन न, किन्तु जीवन-दर्शनत्वेन अपि प्रतिष्ठितः। सुश्रुतः स्पष्टं वदति "तत्त्वविज्ञानाधारितोऽयम् आयुर्वेदः।"[1] आयुर्वेदः स्वभावतः दार्शनिकम् । अतः आयुर्वेदः तत्त्वज्ञानाश्रितः, न केवलं रोगनिवारणकला । भारतीयज्ञानपरम्परायां "दर्शनम्" इति शब्दः केवलं तर्कशास्त्रं वा आध्यात्मिकचिन्तनं न, अपि तु यथार्थस्य साक्षात्कारं ददाति । एवं तत्त्वज्ञानस्य साधनम् आयुर्वेदः यद्यपि चिकित्साशास्त्रत्वेन विख्यातः, तथापि तस्य आधारः तत्त्वमीमांसा, पुरुषदर्शनम्, सृष्टिक्रमविवेचना, दुःखनिवृत्तिमार्गनिर्णयः, प्रमाणमीमांसा इत्यादि न तु केवलं भेषजोपयोगः। भारतस्य प्राचीनवाङ्मये आयुर्वेदः केवलं वैद्यकशास्त्रमेव न, अपि तु एकं सर्वाङ्गिणं दार्शनिकदृष्टिसम्पन्नं विज्ञानपरम्परास्वरूपं अस्ति । आयुर्वेदस्य मूलं वेदेभ्यः, विशेषतः अथर्ववेदे निहितम् अस्ति । तस्मात् एषः आयुर्वेदः केवलं देहपरिमितो न भवति, किन्तु जीवनस्य सर्वतोमुखं दर्शनम् उपदिशति । एवं चिरकालपरम्परायां, भौतिक-आध्यात्मिक-नैतिक-सामाजिकेषु सर्वेषु आयामेषु आयुर्वेदस्य दार्शनिकभूमिका स्पष्टं दृश्यते। आयुर्वेदशास्त्रे "आयुः" इति केवलं प्राणधारणं न, किन्तु शरीर-इन्द्रिय-मनः-आत्मसमन्वितं सम्पूर्णजीवनम् इति निरूपितम्। चरकाचार्यः स्पष्टं वदति "हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् । मानं च तच्च यत्रोक्तं आयुर्वेदः स उच्यते ॥"[2] अतः शास्त्रस्य लक्ष्यं शारीरिकौषधानि न, किन्तु हिताहितविवेकः, धर्मशीलनम्, दैहिक-मानसिक-आध्यात्मिकसाम्यस्य रक्षणम् इत्यादयः अपि । एवं दर्शनपरम्परापोषितस्य शास्त्रस्य मूलं दार्शनिकचिन्तनमेव । वेदानां अध्यात्मं, सांख्यस्य तत्त्वमीमांसा,वैशेषिकस्य पदार्थविचारः, योगस्य मनोशोधनम्, न्यायस्य प्रमाणपरम्परा इत्येते सर्वे आयुर्वेदं पूर्णतया अवलम्बन्ति।

## आयुर्वेदस्य तात्त्विकाधाराः - किमर्थं दर्शनम्?

आयुर्वेदे न केवलं औषधकलाऽस्ति, किन्तु सृष्टिक्रमः (भावानां क्रमोत्पत्तिः) पञ्चमहाभूतसिद्धान्तः, त्रिदोषसिद्धान्तः, आत्मा–मनस्–इन्द्रिय–अर्थसंबन्धः, पुरुषलक्षणम्, प्रमाणविचारः, हित–अहित–सुख–दुःख–जीवन–आयुष्यविचारः इत्यादयः सर्वेगणाः दर्शनस्य एव क्षेत्रे अन्तर्भवन्ति। अतः चरकाचार्यः अपि दर्शनतत्त्वं प्रतिपादयन् लिखति "आयुः - शरीरेन्द्रियसत्त्वात्मसंयोगः"[3] इति शारीरात्मसंबन्धः "तत्र हेतुः दृष्टानुशासनयोगात्"[4] अत्र "दृष्ट–अनुशासन" इत्यनेन प्रत्यक्ष–आगम इति दार्शनिकप्रमाणयोः उपयोगः सूचितः। अतः आयुर्वेदः दर्शनात्मकं विज्ञानं । वेदेषु, विशेषतः अथर्ववेदे, आयुर्वेदस्य दार्शनिकछाया सुस्पष्टा दृश्यते। अथर्ववेदे अनेकानि सूक्तानि जीवनम्, आरोग्यम्, औषधयः, प्राणशक्तिः, चक्राणि, देवतास्वरूपं च विवृण्वन्ति। उदाहरणरूपेण - "त्रायन्तां मे देवगणाः सर्वे प्राणाः शुभा पुनः। आयुषे वार्यं धनं प्रजां पुष्टिं महोयशः ॥"[5] इत्यनेन स्पष्टं यत् वेदेषु आरोग्यं दैवी-मानवीयसमन्वयरूपेण अभिहितं, यत् आयुर्वेदस्य मूलदृष्टिः भवति । यथा साङ्ख्यादिदर्शनेषु

[1] सुश्रुतसंहिता, सूत्रस्थान १.४
[2] चरकसंहिता, सूत्रस्थाने १.४१
[3] चरकसंहिता, सूत्रस्थान १.४२
[4] चरकसंहिता, सूत्रस्थान
[5] अथर्ववेदः १.१०.२९

प्रतिपादित सिद्धान्तैः ते दर्शनत्वं प्राप्नुवन्ति तथैव आयुर्वेदेपि तत्सम सिद्धान्ताः प्रतिपादिताः वर्तन्ते । यथा-
तत्त्वसृष्टिक्रमः - सांख्ये २५ तत्त्वानि – प्रकृतिः, पुरुषः, बुद्धिः, अहंकारम्, तन्मात्राणि, महाभूतानि इत्यादयः। चरकाचार्यः अस्य सिद्धान्तस्य चिकित्सा-व्यवहारानुकूलनं करोति "एतेषां भूतानाम् आहारशयानिनी सृष्टिः…।"[6] चरकस्य भूतसृष्टिविचारः सांख्यस्य तन्मात्र–महाभूतक्रमं प्रतिपादयति।

पञ्चमहाभूतानि(पृथिवी, जल, तेजस्, वायु, आकाशः) तेषां दोषरूपेण (वात, पित्त, कफ) जीवितव्यवस्थायां उपयोगः द्रव्यगुणविज्ञानम् — गुणाः, कर्माणि, विरुद्धता, संयोगः।

सांख्यस्य तत्त्वानुक्रमः -महत् → अहंकारः → तन्मात्राणि → भूतानि इत्यादिक्रमः आयुर्वेदे पञ्चमहाभूतसिद्धान्तस्य आधाररूपेण प्रदर्श्यते । चरकसंहितायां उच्यते "पुरुषः प्रकृतिसम्पन्नः पञ्चमहाभूतसंघातः"[7]

आयुर्वेदे सांख्यस्य पुरुष-प्रकृतिवादः स्पष्टतया स्वीकृतः। सांख्ये "पुरुषस्तु केवलो निष्क्रियः साक्षी"[8] पुरुषः निरपेक्षः, साक्षीचेतना।
आयुर्वेदे "शरीर आत्मा मनो इन्द्रियार्थसन्निकर्षः पुरुषः"[9] शरीरे आत्मा प्रतिष्ठितः । अर्थात् आत्मा न केवलं द्रष्टा, किन्तु आरोग्यस्य केन्द्रबिन्दुः। तयोः अभेदः दृष्टः। अत्र सांख्यपुरुषस्य आयुर्वेदे "सम्पूर्णजीवनघटक" स्वरूपे विस्तरणम् विद्यते।

सांख्यस्य प्रकृतिविकृतिवादः आयुर्वेदे दूषितदोषैः सत्त्व–रजस्–तमः–मनसां विकारैः शरीर–इन्द्रिय–मनोगतदुष्टि, प्रकृति–विकृति–साम्य–वैषम्यविचारः इत्यादिरूपेण स्वीकृतः। सांख्ये प्रतिपादित "विकृति–साम्य–वैषम्य" सिद्धान्तः आयुर्वेदे "दोषधातुमलानां साम्यं स्वास्थ्यं, वैषम्यं रोगः।"[10] एवं रुपेण प्राप्यते ।

प्रमाणेषु मुख्यानां त्रयाणां प्रत्यक्षानुमानाप्तागमानामेव स्वारस्यं प्रदर्शितम् । स्वतन्त्रं च प्रमाणान्तरं युक्तिरुपेण स्वीकृतम् । युक्तिश्चानुमानाद् भिन्नैव, तत्रापि कार्यकारणयोः सम्बन्धः प्रमीयते, किन्तु युक्तौ एकस्मिन्काये स्थादिरूपे गर्भविकारादिरूपे च बहूनां कारणानां संयोगाद् या कार्यनिर्वृत्तिः तस्याः ज्ञानं मुख्यं, तस्मिन् कार्ये समवेतानां कारणानाम् अन्वयव्यतिरेकेण कार्यजन्मप्रतिकारणत्वेन सम्बन्धज्ञानं, तेषां विशिष्टक्रमेण सम्भूय तत्कार्यं प्रति एवं हेतुना प्रतिनियता वर्तते । अतः तत्र सजातीयमुदाहरणम् उपन्यस्तुं न शक्यते । अतः युक्तौ दृष्टान्ताभावः । अनुमाने तु सपक्षोदाहरणद्वारैव उपनयनिगमने भक्तः । एवं गर्भादिकार्यनिर्वृत्तौ स्वास्थ्यविकारयोर्वासमुत्पत्तौ अरणेरग्निजन्मनि वा न शुक्रशोणितयोरेव, हिताहितसेवनयोरेव, मन्थनकाष्ठयोरेव वा हेतुता, किन्तु इतरेषामपि काल-क्षेत्र-आहारादिसंपदः तथा दोष-दूष्य-प्रकृति-बलाग्न्यादीनां मन्थनादिव्यापारस्य च क्रमशः एषु कार्येषु सहयोगः, विपक्षभावेन वा वर्तनमपि, तथैव कार्यस्य उत्पत्तौ अनुत्पत्तौ वा कारणतया वर्तते, सर्वेषां सामग्रयादेव कार्योत्पत्तिः, एकस्याप्यभावाद् असहयोगाद्वा न कार्योत्पत्तिः । एवं यत् बहूनामेकस्मिन् कार्ये सम्बन्धज्ञानम् इति कर्तव्यता ज्ञानं च तत् युक्तिपदेन प्रमाणान्तरत्वेन आयुर्वेदे स्वीकृतम् । युक्तितश्च त्रैकालिकं प्रमाणमिति विशेषः कालत्रयसम्बंधिवस्तुनो ज्ञानसाधनत्वाद्। परलोक स्थापनायां चिकित्साव्यवहारे च तस्याः प्रदर्शितं साफाल्यम् । इतरेषां प्रमाणानां च न मुख्यत्वेन स्वीकारः किन्तु वादमार्गे तेषां ज्ञानं आवश्यकमित्यम्युपगमसिद्धान्तत्वेन स्वीकारः उपमान-अर्थापत्ति-संभव-ऐतिह्यादीनाम् । कमलशीलशांतिरक्षिताभ्यां युक्ति प्रमाणस्य प्रस्तावकत्वेन चरकमुनेः नामोल्लेखपूर्वकः निर्देशः कृतो दृश्यते इति प्रमाणाद् आयुर्वेदस्य दार्शनिकत्वं स्वतन्त्रदर्शनं च विद्वत्सुप्रसिद्धम् इति ।

पुनश्चायुर्वेदायतरणसमये समवेता महर्षयः सर्वे ब्रह्मज्ञानस्य निधयः इति अन्वय विशेषणविशिष्टाः । न्यायशास्त्रप्रवर्तकः गौतमः, वेदान्तप्रवक्ता बादरायणः, वैशेषिकशास्त्रप्रवर्तकः कुशिकः कणादः । एवमन्येऽपि शास्त्रप्रवक्तारः स्युः येषु आत्रेयोऽप्यन्यतमः आसीत् सोऽपि सांख्यानुयायिषु श्रेष्ठः इति । एवं स्थिते तेषां सर्वेषां ज्ञानस्य मूलस्रोतः किंचिदेकं स्वतन्त्रं वेदरूपं प्राचीनमन्यद्वा स्याद् अथवा समकालीनानां तेषां परस्परविचारेषु प्रभावो वा स्यात् । तत्र पूर्वः पक्षः अधिकं आद्रियते । महाभारते, गीतायां च यत्र कुत्रापि दार्शनिकचर्चायां समवेतानां गणना प्रक्रम्यते तत्र बहूनां नाम्नां साम्यमपि दृश्यते यथा-नारदः, देवलः, असितः, व्यासः, एषां यथा आयुर्वेदे निर्देशः तथा पूर्वोक्तेषु ग्रन्थेष्वपि । सत्ताऽपि तेषां समकालता, भूयोभूयः तत्त्वजिज्ञासार्थ संभाषापरिषत्सु समवैतत्त्वं च ज्ञायते । अतः अन्य-शाखाप्रवर्तकाचार्याणामिव आयुर्वेदप्रवर्तकाचार्याणामपि दर्शनं स्वतन्त्रमेव वर्तते यदि कुतोऽपि संगृहीतं स्वात् तन्नस्वसमकालीनेभ्यः किन्तु

[6] चरकसंहिता, शारीरस्थान १.२७ (आयुर्वेददीपिका व्याख्या)
[7] चरकसंहिता, सूत्रस्थान १.४६
[8] सांख्यकारिका -१७
[9] चरकसंहिता, शारीरस्थान १.१२
[10] सुश्रुतसंहिता, सूत्रस्थान १५.४१(निबन्धसङ्ग्रह व्याख्या)

ISSN: 2349-6002

प्राचीनेभ्यः पूर्वाचार्येभ्य एव येषां वर्तमानसमये परम्परागतत्वान्नोपलभ्यते नामापि । एवं आयुर्वेदीयं दर्शनं स्वतन्त्रं, प्राचीनं एव इतिमुख्यः पक्षः । अथवा स्वतन्त्रं सदपि इतरदर्शनानां समकालीनं प्राचीनविचारप्रणालीनां प्रतिविम्बनाद् इति सम्यक् निश्चीयते ।

आधुनिकसन्दर्भे आयुर्वेददर्शनस्य प्रासङ्गिकता

आधुनिकयुगे यत्र जीवनं यान्त्रिकं जातम्, मनोविकाराः वर्धन्ते, तनावः प्रमुखरोगकारणं भवति, तत्र आयुर्वेदस्य दर्शनात्मकदृष्टिः आहार–विहार–आचार–विचार–सन्तुलनम् अत्यन्तं प्रासङ्गिकी सिद्ध्यति । Holistic medicine, psychosomatic health, preventive healthcare - एते सर्वे आधुनिकविचाराः आयुर्वेददर्शने पूर्वमेव निहिताः।
एवं आयुर्वेदः दर्शनमूलकः, प्रमाणाधिष्ठितः, अनुभवसिद्धः, कालातीतः, सार्वभौमिकः, इति सिद्ध्यति । आयुर्वेदः न केवलं चिकित्साशास्त्रम्, न केवलं औषधविद्या, अपि तु जीवनस्य तत्त्वमीमांसा, दर्शनानां समन्वयात्मकं स्वरूपम्, मानवकल्याणकेन्द्रितं सम्पूर्णदर्शनम् । "आयुर्वेदः दर्शनरूपेण विनिर्मितं जीवनशास्त्रम्, यत्र तत्त्वज्ञानं चिकित्सारूपेण, च जीवनदर्शनं आरोग्यरूपेण अवतरति ।"

सन्दर्भग्रन्थ-सूची

[1] चरकसंहिता – आचार्य चरकः
[2] सुश्रुतसंहिता - आचार्य सुश्रुतः
[3] चरकसंहिता(आयुर्वेददीपिका व्याख्या)-चक्रपाणिदत्तः
[4] सुश्रुतसंहिता(निबन्धसङ्ग्रह व्याख्या)- डल्हणः
[5] अथर्ववेदः संहिता
[6] सांख्यकारिका- ईश्वरकृष्णः